रचयिता श्रीमच्चन्द्रकीर्त्ति । भाषा संस्कृत । पत्र संख्या ४१२. प्रत्येक पृष्ठ पर १५ पंक्तियां तथा प्रति पंक्ति में ३५-४० अक्षर । साइज ११×४॥ इञ्च ।

मंगलाचरण—

सिद्धं जिनं सद्द्रव्यापेक्षया साधनाद्यथ ।
सद्द्रव्यसाधनं ध्रौव्यव्ययोरस्त्यंकितं मतं ॥ १ ॥

प्रशस्ति—

सत्काष्टसंघभवनंदितटाख्यगच्छे
जातो मुनिः सकलसद्गुणमंडितात्मा ।
श्रीरामसेन इति यस्य जगत्प्रकाशं,
वादीभकेसरपतेरभिधानमासीत् ॥ १ ॥
तस्यान्वये समभवत् किल सूरिवर्यः
श्रीधर्मसेन इति नाम दधन् मनोज्ञं,
यस्येहवादिकरिकेसरिणो विशाला
कीर्त्तिर्जगद्र चिरमंडपगा बभूव ॥ २ ॥
तस्याभवद् विमलसेन इति प्रसिद्धः
सूरिपदांबुजविकासनसप्रसप्तिः ।
प्राप्तानवद्यशुभविद्यउदारकीर्त्तिः
विद्वज्जनप्रकरपूजितपादपीठः ॥ ३ ॥
तस्याभ्यभूदखिलपंडितपूजितांघ्रि
सत्पट्टपंकजरविः सुचरित्रपात्रं ।
नाम्नार्थमत्रधिगात् न विशालकीर्त्ति-
र्यस्मात्प्रबोधमधिगम्य बुधा ननंदुः ॥ ४ ॥
तत्पट्टसागरनिशाकर आविरासीत्
श्री विश्वसेन इति नाम दधन् मुनींद्रः ।
याद्दशानां समधिगम्य जगत्प्रबोधम्
लब्ध्वा समस्तवृजिनार्णवपारमापत् ॥ ५ ॥
तत्पट्टेप्यभवत् समस्तजनताव्यामोहवन्यादवो
विद्वत्पंकजभास्कराः मुनिजनोः सेव्यांघ्रिपाथोरुहः ।

विद्याभूषण इत्यशेषविदुषां श्रोत्रप्रकाशेन योः
नाम्नाख्येन बुधान..........दहोकांस्काम्मुनीद्रश्चिरं ॥ ६ ॥
श्रीभूषणाख्यो भवदस्यपट्टे भट्टारको लब्धसमस्तविद्यः।
यो वादिगर्वाकुलशैलवज्रो नावोचयत्कांश्चिद्र वोवचोभिः ॥ ७ ॥
लब्धा गुरुत्वं च खलु वाक्यतित्वं कलानिधित्वं च महामतिर्यः।
प्रकाशतां देवलभे......यासीत् किं तस्य वाच्यं तपसो महत्त्वं ॥ ८ ॥
तस्यास्त्येको नामतश्चंद्रकीर्त्तिः
शिष्यं स्वाम्यं प्र यंबुजेर्दिदिरोयः।
पात्रे ज्ञात्वापि यस्मिन्नजस्रं
जाता दृष्टिः सद्गुरोः स्नेहपूर्णा ॥ ९ ॥
तेन व्यधायि मुनिनाखिलदोषहारी लोकत्रयप्रथितसारमुदारभावं।
सीतारघूत्तमचरित्रपयोधिरत्नं बलूत्र छक्रनविधिपद्मपुराणमेतत् ॥ १० ॥
रघुपतितरुरस्मान्पातुसम्यक्त्वबीजः
शुभभवति शाखो योगिसंसत्पलाशः।
सुरमधुपयुतश्रीपंचकल्याणयुक्तो
लसदमृतफलोऽयं सत्तपः पीठबंधः ॥ ११ ॥
यावद्धरामेष सुमेरुशैलो बिभर्त्ति सूर्यश्चतपत्यजस्रं।
तावन्मुदि पद्मपुराणमेतद् भूयो जनानां निखिलाघहारि ॥ १२ ॥

इति श्रीमच्चंद्रकीर्त्तिमुनीद्रविरचितं पद्मपुराणं समाप्तमगमत्।

२३. पद्मपुराण।

रचयिता भट्टारक श्री धर्मकीर्त्ति। भाषा संस्कृत। पत्र संख्या २५१. साइज १०×४॥ इञ्च। प्रत्येक पृष्ठ पर १३ पंक्तियां तथा प्रति पंक्ति में ३८–४२ अक्षर। प्रति प्राचीन है। रचना संवत् १६६९ लिपि संवत् १६७०.

मंगलाचरण—

शक्रालीमौलिरत्नांशुवारिधौतपदांबुजं।
ज्ञानादिमहिमाव्याप्तं विष्टपं विष्टपाधिपं ॥ १ ॥
मुनिसुव्रतनामानं सुव्रताराधितक्रमं।
वंदे भक्तिभरानम्रः श्रेयसे श्रेयसि स्थितं ॥ २ ॥

अन्तिम पाठ तथा प्रशस्ति—

एतद्कथाश्रवाद्भव्यः श्रद्धावान सत्क्रियायुतः।
संसाराब्धिं समुत्तीर्य प्राप्नुयात् शिवमुत्तमं ॥ १ ॥

अथाभवन्मूलसुसंघएव गच्छे सरस्वत्यभिधेगणे च ।
बलात्कृती श्री मुनिपद्मनन्दिः श्रीकुंदकुंदान्वयलब्धसूतिः ॥ २ ॥
देवेंद्रकीर्त्तिश्च बभूव तस्य पट्टे महिष्ठेसु महानुभावः ।
त्रिलोककीर्त्तिस्ततआसदीशो भट्टारकस्तत्पदलब्धनिष्ठः ॥ ३ ॥
सहस्रकीर्त्तिर्मुनिवृंदसेव्यो यशःसुकीर्त्तिः शुभकीर्त्तिसिंधुः ।
बभूव भट्टारकसत्पदस्थो मुनिः स्मरारेर्हनने प्रवीणः ॥ ४ ॥
तत्पट्टपंकेजविकाशने यः साम्यं बिभर्त्तीह सहस्रभानोः ।
हतस्मरारिर्जितदुःकषायो विनष्टदुर्भाव च यो महात्मा ॥ ५ ॥
यं वीक्ष्य लोकव्रतभासुरांगतपस्विनं शास्त्रविदं मुनीशं ।
भजंति मिथ्यात्वं च यं न जातु क्रियापरं शीलनिधि सुशांतं ॥ ६ ॥
यं सेव्यमानाः सततं सुशिष्याः विज्ञातत्त्वाव्रतभासुरांगाः ।
भवन्ति नूनं जगति प्रकाशास्तपःकृशा गौरविणो गुणौघैः ॥ ७ ॥
यं सेवमानः समकुक्षिजातं मुनीशमासीद्बुधरत्नपालः ।
पटुत्ववाग्मित्वकवित्वविश्वविनीततासद्गुणरत्नपात्रं ॥ ८ ॥
एवं विधोऽसौ मुनिसंघसेव्यो भट्टारको भासितदिक् समूहः ।
संघस्य कल्याणतति प्रदेया नाम्नागुरुः श्रीललितादिकीर्त्तिः ॥ ९ ॥
तच्छिष्यस्तत्पदस्थो व्रतनिचययुतो जैनपादाब्जभृंगो,
    नाम्नाधर्मादिकीर्त्तिर्मुनिरमलमनास्तेन चैतत्पुराणं ।
स्वल्पप्रज्ञेन दृष्टं निजदुरितचयप्रक्षयाय हिताय,
    भव्यानां च परेषां श्रवणसुपवने प्रोद्यतानामजस्रं ॥ १० ॥
मूलकर्त्तापुराणस्य श्री जिनश्चोत्तरस्तथा ।
गणीशो यतयोन्ये च उत्तरोत्तरकर्तृकाः ॥ ११ ॥
इदं श्री रविषेणस्य पुराणं वीक्ष्य निर्मितं ।
चिरस्थेयाः क्षितौ भव्यैः श्रुतं चाधीतमन्वहं ॥ १२ ॥
संवत्सरे षट्शते मनोज्ञे चैकोन सप्तत्यधिके सुमासे ।
श्रीश्रावनेसूर्यदिने तृतीया तिथौ देशेषु हि मालवेषु ॥ १३ ॥
सरोजपुर्य्यामिव धर्म्मपुर्या सहायतः श्री ललितादिकीर्त्तिः ।
पारंगतश्चास्य पुराणचार्द्धं गहं प्रहीणोपि मतिप्रपंचैः ॥ १४ ॥
तर्क्कव्याकरणछंदोलंकारादिन् प्रपंचतः ।
न वेद्म्यहं ततस्तेषां च्युतौ कार्याक्षमासतां ॥ १५ ॥

ग्रंथो विस्तारणीयोयं सद्भिः परहिते रतैः ।
यतः पद्मानि सूर्तेभस्तद्ग्रंथं नयतेनिलः ॥ १६ ॥
अथ धर्मोजिनैरुक्तो वर्द्ध तामत्र शाश्वतः ।
संघस्य तुष्टिपुष्टी च भूयास्तां सर्वकर्म्मसु ॥ १७ ॥
क्षेमं च सर्वलोकानां भूयाच्च विजयी नृपः ।
काले काले प्रवर्षंतां मेघामौभिक्ष्यकारिणः ॥ १८ ॥
व्याधयो यान्तु नाशं च दुर्भिक्षं चौरमारयः ।
प्रलयं यांतु पृथ्वीस्तु फलिनी धर्मशक्तितः ॥ १९ ॥
श्रोतृणां पाठकानां च लेखकानां तथैव च
भूयात्कल्याणसत्प्राप्तिर्धर्मचक्रप्रसादतः ॥ २० ॥
धर्मकार्येषु सर्वेषु सर्वाश्च जिनदेवताः ।
सहायिन्योहि भूय सुः प्रमादपरिमुच्य च ॥ २१ ॥

इति श्री पद्मपुराणे भट्टारक श्रीधर्मकीर्त्तिविरचिते पद्मदेवनिर्वाणगमनवर्णनो नाम चतुश्चत्वारिंश पर्वः ॥

संवत्सरे १६७० मिते मासे चंद्रकारावदाते पक्षो मंगलास्य दीपां मंगल⋯⋯ तिरस्कृतां विस्तप्रसारे रविवारे प्रशस्तगुणश्रेष्ठायां ज्येष्ठायां च घनो—पवनादिशोभाभरित⋯⋯ सेखमंलासे महानगरे विद्वज्जनपूरिताकारे चंद्रप्रभजिनागारे श्रीमति नष्टाघे मूलसंघेह शारदागच्छे वर्द्धितसुकृतवने बलात्कारगणे च स्वयशसा व्याप्ताखिलमूर्त्ति भट्टारको यशःकीर्त्ति नामासीत। तत्पट्टे ललितवाक्यामृत न्यक्कृताखिलमूर्त्ति भट्टारको ललितकीर्त्तिर्वर्त्तते । तत्पट्टोदयाद्राविनमूर्त्तिभट्टारको धर्मकीर्त्तिः वर्त्तते मुनींद्रः । तेनेदमुपासिकार्पितद्रव्येण लेखयित्वा निजांते वासिने गांगानाम्ने प्रदत्तं अधीत्यो—

२४. प्रतिष्ठापाठ ।

रचयिता महापंडित श्री आशाधर । भाषा संस्कृत । पत्र संख्या १६४. साइज १०॥×५ इञ्च । प्रत्येक पृष्ठ पर ६ पंक्तियां तथा प्रति पंक्ति में २५-२८ अक्षर । रचना संवत् १२८५. इसका दूसरा नाम जिनयज्ञ कल्प भी है । ग्रंथ में ६ अधिकार हैं तथा सम्पूर्ण पद्य संख्या ६५४ हैं । ग्रन्थ छप चुका है ।

प्रशस्ति—

श्रीमानस्ति सपादलक्षविषयः शाकंभरीभूषणः
तत्र श्री रतिधाममंडलकरं नामास्ति दुर्गं महत् ।
श्री रत्न्यामुदपादि तत्र विमलव्याघ्रेरवालान्वयात्,
श्री सल्लक्षणतो जिनेंद्रसमयश्रद्धालुराशाधरः ॥ १ ॥

व्याघ्रेरवालवरवंश सरोजहंसः
काव्यामृतौघरसपानसुतृप्तगात्रः ।
सल्लक्षणस्य तनयो नयविश्वचक्षु
राशाधरो विजयतां कविकालिदासः ॥

× × × × × ×

आशाधरत्वं मयि विद्धि सिद्धं निसर्गसौंदर्यमजर्यं ।
सरस्वती पुत्रतयादेतदर्थन् परं वाच्य मयं प्रपंचः ॥

× × × × ×

श्रीमदर्जुनभूपालराज्यश्रावकसंकुले ।
जिनधर्मोदय र्थं यो नलकच्छपुरे वसत् ॥

× × × × ×

विक्रमवर्ष सपंचाशीति द्वादशशतेष्टतीतेषु ।
आश्विनि सितांत्यदिवसे साहसमल्लापराख्यस्य ॥

× × × × × × ×

प्रति नं० २. पत्र संख्या १२३. साइज १०॥×४॥ इञ्च । प्रति जीर्ण शीर्ण अवस्था में है ।

संवत् १५६० वैशाखमासे शुक्लपक्षे पूर्णिमायां तिथौ शनिवारे अदेहद्वारपल्लीनगरे श्रीमूलसंघे सरस्वतीगच्छे बलात्कारगणे श्री कुंदकुंदाचार्यान्वये भ० श्रीपद्मनंदिदेवा स्तत्पट्टे भट्टारक श्री विद्यानंदिदेवा स्तत्पट्टे भट्टारक श्री मल्लिभूषणदेवा स्तत्पट्टे भट्टारक श्री लक्ष्मीचन्द्रदेवा स्तेषां शिष्य ब्र० श्रीवृषभदासस्य उपदेशात् श्री शांतिदास लिखापितः ॥

प्रति नं० ३. पत्र संख्या १५५. साइज १२×५॥ इञ्च ।

संवत् १७२२ वर्षे भाद्रमासे प्रतिपदातिथौ गुरुवासरे श्री मूलसंघे नद्याम्नाये बलात्कारगणे .... कुन्दकुन्दाचार्यान्वये भट्टारकवृन्दशोभित श्रीमन्नरेन्द्रकीर्त्ति तत् शिष्य पंडितराज श्री तेजपालजी तत् शिष्य आचार्य श्री चंद्रकीर्त्तिजी तत् शिष्य पं० घासीराम प० भीवसी चिरंजीवी मयाचंद पठनार्थं लिखापितं ।

२५. प्रद्युम्नचरित्र ।

रचयिता श्री सोमकीर्त्ति । भाषा संस्कृत । पृष्ठ संख्या १०५. साइज १०×४॥ प्रत्येक पृष्ठ पर १५-१८ पंक्तियां तथा प्रति पंक्ति में ४४-४८ अक्षर । रचना संवत् १५३० लिपि संवत् १५२४. सोलह सर्ग हैं । चरित्र अभी तक प्रकाशित नहीं हुआ है ।

मंगलाचरण—

श्रीमंतं सन्मति नत्वा नेमिनाथं जिनेश्वरं ।
विश्वजेतापिमदनो बाधितुं न शशाक यं ॥ १ ॥

अन्तिम पाठ तथा प्रशस्ति—

नंदीतटाख्ये विमले सुगच्छे श्री रामसेनो गुणवारिराशिः ।
बभूव तस्यान्वयशोभकारी श्री रत्नकीर्त्तिः दुरितापहारी ॥ १ ॥
श्रीलक्ष्मीसेनोऽत्र ततो बभूव शीलालयः सर्वगुणैरुपेतः ।
तस्यैव पट्टोद्धरणैकधीरः श्री भीमसेनः प्रगुणः प्रवीरः ॥ २ ॥
श्री भीमसेनस्यपदप्रसादात् सोमादिकीर्त्तियुतेन भूमौ ।
रम्यं चरित्रं विनतं स्वभक्त्या संसोध्य भव्याः पठनीयमेतत् ॥ ३ ॥
संवत्सरे सन्निधि संज्ञकेवि वर्षत्रि-त्रिंशैकयुतेपवित्रे ।
विनिर्मितं पौषसुदेश्चतस्यां त्रयोदशा या बुधवारयुक्ता ॥ ४ ॥
यावन्मेरु महीतलेति विदितो यावद्रविमण्डले
यावद्भूवलयः परग्रहगणो यावत्सतां चेष्टितं ।
तावन्नंदतु शास्त्रमेतदमलं श्री शांतिचैत्यालये,
भक्त्या येन विनिर्मितं सुखकरं तस्यास्तुवे सर्वदा ॥ ५ ॥
यावन्मेरु मही यावच्चंद्रार्क तारकाः ।
त नन्ददात्वदं नूनं चरित्रं पापनाशनं ॥ ६ ॥

इति श्री प्रद्युम्नचरित्रे श्री सोमकीर्त्याचार्यविरचिते श्री नेमिनाथप्रद्युम्नशंबकुमरप्रमुखादि निर्वाणगमन नाम षोडशः सर्गः ॥

संवत् १५२४ वर्षे कार्त्तिक बुदी १३ दिने श्र मालवदेशमध्ये श्री सुलतानपुर मध्ये लिखितं शुभं ॥

सवत्सरे रसैककर्मैकांकयुक्ते मासि भाद्रपदे सितेतरे प्रथमायां तिथौ सजीवायां कृष्णगढपुरे श्रीमन्महाभूपबहादुरसिंहजिद्राज्ये श्री मूलसंघे नद्याम्नाये बलात्कारगणे सरस्वती गच्छे श्री कुन्दकुन्दाचार्यान्वये भट्टारक जिद्धी रत्नकीर्त्ति जी तत्पट्टे भट्टारक जिद्धी विद्यानन्दि जी तत्पट्टे भट्टारक जिद्धी महेन्द्रकीर्त्ति जी तत्पट्टे भट्टारक श्री अनंतकीर्त्तिजी तत्पट्टे भट्टारक श्री भवनभूषणजी तत्पट्टे सकलविमलकलकलकलानिधिः करांब मलतरयशो बरसावरीकृतदिकप्रमादनिकरभव्यः भव्यनिवराज्ञानासारांधकारत्वयैककारणप्रभाकरः सद्वचोः विराजमानमहामानजनौघेभव्रातः महाबलपंचानसमानः क्रोधमानमायालोभमहधराधरवज्रोपमान सकलेतरयतिगणनत्रेशविराजमानतरवरजनविहितः प्रशंसवरगुणगणरंलगणरत्नाकरः भट्टारकप्रवर भट्टारकजिद्धी १००८ श्री विजयकीर्त्तिस्तद्विनयतत्परविनेयाचार्यजिद्धी देवेन्द्रभूषणजीस्तत्सतीर्थ बुधास्त्रिलोकचंद्रः सदारामस्तिद्विनेया बुधा दयाचंद्र वर्द्धमान विमलदास दौलतिराम ऋषभदास गुलाबचंद भगवानदास बीरदास मोती जगजीवणस्त्रयभिधानधरा एतेषां पठनार्थं आचार्य श्री देवेन्द्र भूषणेन स्वपठनार्थं इदं चरित्रं लिखितं ।

२६. प्रवचनसार प्राभृत वृत्ति ।

श्री ब्रह्मरत्नदेव । भाषा संस्कृत । पत्र संख्या १८७. साइज १०×४॥ इञ्च । प्रति पूर्ण तथा प्राचीन है । लिपि संवत् १५४३.

मंगलाचरण—

नमः परमचैतन्यस्वात्मोत्थसुखसंपदे ।
परमागमसाराय, सिद्धाय परमेष्ठिने ॥

समाप्त—

एवं पूर्वोक्तक्रमेण एषु सुरासुर इत्याद्येकोत्तरशतगाथापर्यन्तं सम्यक्ज्ञानाधिकारस्तदनन्तरं तम्हा तस्सण माइ इत्यादि दशोत्तरशतगाथापर्यतं ज्ञेयाधिकारोऽपरनामदर्शनाधिकारस्तदनंतरं एवं पणमियसिद्धे इत्यादि·········महाधिकार त्रयेणैकादशाधिकत्रिशत गाथाभिः प्रवचनसारप्राभृतवृत्तिः समाप्ता । सवत १५४३ वर्षे भाद्रपद सुदी ६ तिथौ ।

प्रशस्ति—

श्रीजिनसूरस्य वाक्योत्करकरोत्कराः ।
अज्ञानध्वांतनाशाय भवंतु जगतः परं ॥ १ ॥
श्रीदेश्रीमूलसंघे च नंद्याम्नाये लसद्गणे ।
बलात्कारि जगद्वंद्ये गच्छे सारस्वत्याभिधाः ॥ २ ॥
श्रीमत्कुंदादिकुंदाख्यसूरेरन्वयकेभवन् ।
पद्मनंदी शिवानंदी भट्टारकपदस्थितः ॥ ३ ॥
तत्पट्टांभोजमार्त्तंडः शुभचन्द्रोगणाग्रणी ।
तत्पट्टे चाभवच्छ्रीमान जिनचंद्राभिधोग्रणी ॥ ४ ॥
तच्छिष्यस्तद्गुणैः प्राप्ताचार्यपदवीं मुनिः ।
रत्नकीर्त्तिरितिख्य तस्तदाम्नाये बभूव च ॥ ५ ॥

संगही गोरा तद्भार्या गुणसिरि तयोः पुत्राः सं० सागा, सं० गोगा सं० देवा रत्नपाल तयोः मध्ये सं० गोगा तद्भार्या केलू इदं ज्ञानावरणीकर्म्मक्षयार्थं श्रीमन्मंडलाचार्य रत्नकीर्त्ति तत् शिष्यमुनिविमलकीर्त्तिपदत्तमिदं पुस्तकं । लिखितं पं० गोगा ।

प्रति नं० २. पत्र संख्या ७७. साइज १०×४॥ इञ्च । प्रति पूर्ण है लिखावट सुन्दर है ।

संवत् १५७७ वर्षे आषाढसुदी ३ श्रीमूलसंघे बलात्कारगणे नंद्याम्नाये सरस्वतीगच्छे श्रीकुन्दकुन्दाचार्यान्वये भट्टारक श्रीपद्मनन्दिदेवास्तत्पट्टे भट्टारक श्री शुभचन्द्रदेवास्तत्पट्टे भट्टारक श्रीजिनचन्द्रदेवास्तत्शिष्यमंडलाचार्यः धर्मचन्द्रस्तदाम्नाये खंडेलवालान्वये भौंसागोत्रे साह घोराज भार्या पिवसिरि तत्पुत्र सा.

तिहुणा द्वितीय बीरदास तिहुणा भार्या श्रीमति तत्पुत्र सा. लोहट भार्या ललितादे तत्पुत्रमेघा नेमाभार्या नमणसिरी तत्पुत्र दुलहणी भार्या जैणादे असू तत्पुत्र आसू इदं शास्त्रं नागपुरमध्ये लिखाप्य श्री मुनिधर्मचन्द्रायदत्तं।

२७. पाण्डवपुराण।

रचयिता आचार्य श्री शुभचन्द्र। भाषा संस्कृत। पत्र संख्या ३४७. प्रत्येक पृष्ठ पर ६ पंक्तियां तथा प्रति पंक्ति में ३०–३४ अक्षर। रचना संवत् १६०८. लिपि संवत् १८३१. ग्रन्थ में २५ अधिकार हैं। प्रशस्ति में शुभचन्द्र ने अपनी १० रचनाओं का तथा कितने ही स्तोत्रों का उल्लेख किया है। पाण्डवपुराण की रचना में शुभचन्द्र को अपने शिष्य श्रीपाल वर्णी से सहायता प्राप्त हुई है। ग्रन्थ अभी तक अप्रकाशित ही है। प्रति नवीन है लेकिन दीमक ने खा लिया है। अन्तिम पाठ नहीं है।

मंगलाचरण—

सिद्धं सिद्धार्थसर्व्वस्वं सद्विदं सिद्धसत्पदं।
प्रमाणनयसंसिद्धं सर्वज्ञं नौमि सिद्धये॥ १॥
वृषभं वृषभं भांतं वृषभांकं वृषोन्नतं।
जगत्सृष्टिविधातारं वंदे ब्रह्माणमादिमं॥ २॥
चन्द्राभं चंद्रशोभाद्यं चंद्राच्र्यं चन्द्रसंस्तुतं।
चन्द्रप्रभं सदा चन्द्रमीडे सच्चन्द्रलांछनं॥ ३॥

अन्तिम पाठ तथा प्रशस्ति—

तादृग्विधोऽहं प्रगुणैर्जिनेशं, स्तुवंश्चसद्भिः सकलैः परैश्च।
क्षाम्यः सदा कोपगणं विहाय, बाल्ये जने को हि हितं न कुर्यात्॥ १॥
श्रीमूलसंघे जनि पद्मनन्दी, तत्पट्टधारी सकलादिकीर्त्तिः।
कीर्त्तिः कृता येन च मर्त्यलोके शास्त्रार्थकर्त्री सकला पवित्रा॥ २॥
भुवनकीर्त्तिरभूद् भुवनाधिपैः।
भुवनभास्करचारुमतिस्ततः।
वरतपश्चरणोद्यतमानसो
भवभयाहि खगेट् क्षितिवल्लभी॥ ३॥
चिद्रूपवेत्ता चतुरश्चिरंतनं
चिद्भूषश्चार्चितपादपद्मकः।
सूरिश्चचंद्रादिचयैश्चिनोतु वै
चारित्रशुद्धिस्खलु नः प्रसिद्धिदां॥ ४॥

विजयकीर्तिर्यतिमुदितात्मको,
अजिततान्वमतः सुगतै स्तुतः ।
अवतु जैनमतः सुमतो मतो
नृपतिभि र्भवतो भवतो ········॥ ५ ॥
पट्टे तस्य गुणांबुधि र्व्रतधरो धीमान् गरीयान्वरः
श्रीमच्छ्री शुभचन्द्र एष विदितो वादीभसिंहोमहान् ।
तेनेदं चरितं विचार सुकरं चाकारि चचंद्रूचां,
पांद्रो श्री शुभसिद्धि सात जनकं सिद्ध्यै सुतानां सदा ॥ ६ ॥
चन्द्रनाथचरित चरितार्थं पद्मनाभचरितं शुभचन्द्रः ।
मन्मथस्य महिमानमतन्द्रो जीवकस्य चरितं च चकार ॥ ७ ॥
चंदनायाः कथा येन बद्धवा नांदीश्वरी तथा ।
आशाधरकृतार्चायां वृत्तिः सद्वृत्तिशालिनी ॥ ८ ॥
त्रिंशच्चतुर्विंशतिपूजनं यः सद्वृद्धसिद्धार्चन माव्यधत्ता ।
सारस्वतीयार्चनमत्रशुद्धं चित मणीयार्चनमुच्चरिष्णुः ॥ ९ ॥
श्री कर्मदाहविधिबंधुरसिद्धसेवां
नानागुणौघगणनाथसमर्चनं च ।
श्रीपार्श्वनाथवरकाव्यसुपंजिकां च यः,
स चकार शुभचन्द्रचंद्रतयींचद्रः ॥ १ १० ॥
उद्यापनमदीपिष्ट पल्योपमविधेश्चयः ।
चारित्रशुद्धितपसश्चतुस्त्रिंशद्द्वादशात्मनः ॥ ११ ॥
संशयवदनविदारणमपशब्दसुखंडनं परं तर्क्कं ।
स तत्त्वानिर्णयं वरस्वरूपसंबोधनी वृत्ति ॥ १२ ॥
अध्यात्मपद्यवृत्तिं सर्वार्थपूर्वसर्वतोभद्रं ।
योऽकृतसद्व्याकरणं चिंतामणिनामधेयं च ॥ १३ ॥
कृता येनांगप्रज्ञप्तिः सर्वांगार्थ प्ररूपिका ।
स्तोत्राणि च पवित्राणि षट्पादः श्री जिनेशिनां ॥ १४ ॥
तेन श्री शुभचन्द्रदेवविदु–सत्पांडवानांवरं,
दीप्यद्वशाशिभूषणं शुभभरभ्राजिष्णुशोभकरं ।
शुभद्भारतीनाम निर्मलगुणं सच्छन्दचिंतामणि,
पुष्पदपुण्यपुराणमन्त्रसुकरं चाकारि प्रीत्यामहत् ॥ १५ ॥

शिष्यस्तस्य समृद्धबुद्धिविशदो यस्तर्क वेदीवरो,
वैराग्यादिविशुद्धिवृंदजनकः श्रीपालवर्णीमहान् ।
संशोध्याखिल पुस्तकं वरगुणं सत्पांडवानामिदं
तेनालेखि पुराणमर्थनिकरं पूर्वे वरे पुस्तके ॥ १६ ॥
श्रीपालवर्णिनाकारि शास्त्रार्थ संग्रहे ।
साहाय्यं सचिरं जीयात् वरविद्याविभूषणः ॥ १७ ॥
ये शृण्वन्ति पठंति पांडवगुणं संलेखयंत्यादरात्-
लक्ष्मीराज्यनराधिपस्यच सुता चाकित्वशक्रेशिनां ।
भुक्त्वाभोगमिदं पुराणमखिलं संवोभुवत्कुन्नता,
मुक्तो ते भवभीमनिम्नजलधिं संतीर्य शांतं गताः ॥ १८ ॥
अर्हतो ये जिनेंद्रावरवचनचयैः प्रीणयंतः सुभव्यान् ,
सिद्धाः सिद्धिं समृद्धिं ददत् इह शिवं साधवः……

× × × × × ×

संवत् १८३१ वर्षे वैशाखसुदि ६ रविदिने श्री मूलसंघे सरस्वतीगच्छे बलात्कारगणे भट्टारक श्री सुरेंद्रकीर्त्तिः आम्नाये आचार्य श्री विजयकीर्त्ति शिष्य रूपचंद उपदेशात् आदौ वासी शेरपुर अधुना वासी कोटा नगरे रामपुरा मध्ये जाति बैद साहजी श्री कवलापति जी तत्पुत्र साहजी श्री धर्ममूर्त्ति जैतरामजी भर्या बाई अनोपमातत्पुत्र साहजी श्री धर्ममूर्त्ति तुलारामजी साहजी श्री वर्द्धमानजी साहजी श्री ताराचंदजी तुलारामस्य भार्या बाई जगां वर्धमानजी भार्या बरधादे ताराचंदस्य भार्या तारमदे बाई कुंदना वर्धमानस्य पुत्र उमेदराम। ताराचंदस्य पुत्र माणिकचंदजी आत्मकल्याणार्थं ज्ञानावरणीकर्मक्षयार्थं साहजी श्री धर्ममूर्त्ति श्री तुलारामजी घटापितं शास्त्रं पाण्डवपुराणं ।

२८. पुण्याश्रव कथाकोश ।

रचियता श्री मुनि केशवनन्दि के शिष्य रामचन्द्र मुमुक्षु । भाषा संस्कृत । पत्र संख्या १५६. साइज १०×४॥ इञ्च । प्रत्येक पृष्ठ पर ११ पंक्तियां तथा प्रति पंक्ति में ४३-४६ अक्षर । कोश में ५२ कथायें है । ग्रन्थ के अन्त सूची दे रखी है ।

मंगलाचरण—

श्रीवीरं जिनमानम्य वस्तुस्त्वप्रकाशकं ।
वक्ष्ये कथामयं ग्रंथं पुण्याश्रवाभिधानकं ॥ १ ॥

ग्रन्थ समाप्ति—

इति पुण्याश्रवाभिधाने ग्रंथे केशवनन्दिदिव्यमुनिशिष्यरामचंद्रमुमुक्षु विरचिते दानफलाख्य-वर्णनो षोडशवृत्ताः समाप्ताः ।

प्रशस्ति—

यो भव्याब्जदिवाकरो यमकरो मारेभपंचाननो,
नानादुःखविधायिकर्मकुभृतो वज्रायते दिव्यधीः ।
यो योगींद्रनरेंद्रवंदितपदो विद्यार्णवोत्तीर्णवान्,
ख्यातः केशवनंदिदेवयति यः श्री कुन्दकुन्दान्वयः ॥ १ ॥
शिष्योऽभूत्तस्य भव्यः सकलजनहितो रामचन्द्रो मुमुक्षुः,
ज्ञात्वा शब्दापशब्दान् सुविशदयशसः पद्मनंद्याह्वयाद्
वंद्यात् वादीभसिंहात्परमयतिपते सो व्यधाद् भव्यहेतो
र्ग्रंथं पुण्याश्रवाख्यं गिरिसमितिमितै र्दिव्यपद्यैः कथार्थैः ॥ २ ॥
कुंदकुंदान्वये ख्याते ख्यातो देशो गणाग्रणी ।
अभूत संघाधिपः श्रीमान् पद्मनन्दी त्रिरात्रिकः ॥ ३ ॥
वृषभाधिरूढो गणयोगणोद्यतो
विनायकानंदितचित्तवृत्तिकः ।
उमासमालिंगित ईश्वरोपम
स्ततोप्यभूत् माघवनंदिपंडितः ॥ ४ ॥
सिद्धांतशास्त्रार्णवपारदृश्वा
मासोपवासी गुणरत्नभूषः ।
शब्दादिवार्थी विबुधप्रधानो.
जातस्ततः श्रीवसुनन्दिसूरिः ॥ ५ ॥
दिनपतिरिवानित्यं भव्यपद्माधिबोधी
सुरगिरिरिवदेवैः सर्वदा सेव्यपादः ।
जलनिधिरिव शश्वत् सर्वसत्त्वानुकंपी,
गणभृदजनिशिष्यो मौलिनामातदीयः ॥ ६ ॥
कलाविलासः परिपूर्णवृत्तो
दिगंबरालंकृति हेतुभूतः ।
श्री नंदिसूरिर्मुनिवृद्धवंद्यः
तस्मादभूच्चंद्रमानकीर्त्तिः ॥ ७ ॥
चार्वाकबौद्धजिनसांख्यशैवद्विजानां,
वाग्मित्ववादिगमकत्वकवित्वविज्ञः ।
साहित्यतर्कपरमागमभेदभिन्नः
श्री नंदिसूरिगगनांगनपूर्णचंद्रः ॥ ८ ॥
समाप्तोऽयं पुण्याश्रवाभिधानकं………….।

२६. पुराणसार संग्रह ।

रचयिता भट्टारक श्री सकलकीर्त्ति । भाषा संस्कृत (गद्य) । पत्र संख्या १२६. साइज १३×५॥ इञ्च प्रत्येक पृष्ठ पर १२ पंक्तियां तथा प्रति पंक्ति में ४७-५१ अक्षर । विषय-आदिपुराण उत्तर पुराण पाण्डवपुराण आदि के सार का वर्णन । लिपि संवत् १८२२. संग्रह अभी तक अप्रकाशित है ।

मंगलाचरण—

सर्व्वकर्मारसंतानं हत्वा येन तपस्विना ।
मोक्षश्रीसाधिता तस्मै नमोऽजितजितात्मने ॥ १ ॥

अन्तिम पाठ—

धर्म्मांगं धर्म्ममूलं गुणगणसदनं तीर्थराजस्य आर्त
विश्वार्च्यं विश्ववंद्यं गणधररचितं कीर्तितं कीर्त्तिमद्भिः ।
भव्याराध्यं शरण्यं भवभयसकृतां धर्म्मिणांमुक्ति हेतोः,
दुः कर्मघ्नं हि जीयान्नरसुरमुनिभिः ज्ञानतीर्थं चरित्र्यों ॥ २ ॥

प्रशस्ति—

संवत १८२२ वर्षे शाके १६८७ प्रवर्त्तमाने कार्त्तिकमासे कृष्णपक्षे तिथौ ८ सोमवासरे पुनर्वसुनक्षत्रे शिवयोगे श्री मूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्रीकुन्दकुन्दाचार्यान्वये भट्टारक श्री पद्मनन्दिदेवास्तत्पट्टे द्वितीयशिष्यमंडलाचार्य श्री रत्नकीर्त्तिदेवास्तत्पट्टे मंडलाचार्यः श्रीविशालकीर्त्ति देवास्तत्पट्टे मंडलाचार्यः श्री लक्ष्मीचंद्रदेवास्तत्पट्टे भट्टारक श्री सहस्रकीर्त्तिदेवास्तत्पट्टे मं० श्रीनेमचंददेवास्तत्पट्टे मंडलाचार्य श्री यशः कीर्त्तिदेवास्तत्पट्टे मंडलाचार्य श्री भानुकीर्त्तिदेवास्तत्पट्टे मंडलाचार्य श्री भूषणजी देवास्तत्पट्टे मंडलाचार्य श्री धर्मचन्द्रदेवास्तत्पट्टे मंडलाचार्य श्री देवेन्द्रकीर्त्तिदेवास्तत्पट्टे मंडलाचार्यः श्रीअमरेंद्रकीर्त्तिदेवास्तत्पट्टे मंडलाचार्य श्री रत्नकीर्त्तिजी तदाम्नाये त्रयोदशप्रकारचारित्रप्रतपालक आचार्य श्री १०८ लक्ष्मीचन्द्रजी तत्पट्टे आचार्य १०८ नरेंद्रकीर्त्तिस्तत्पट्टे पूरमपूज्य सकलगुणगणालंकृताचार्य १०८ श्री सकलकीर्त्तिजी तत्पट्टे पंचमहाव्रतधारकः पंचसमितिधारकः त्रयगुप्तिसाधकः अष्टाविंशमूलगुणयुक्तः द्वाविंशपरिषहसहनधीरः सप्तदशसंयमभेदनित्याचरन आचार्यवर्य्यधैर्यः सकलशिरोमणि आचार्य जी श्री १०८ श्री क्षेमकीर्त्ति जी तच्छिष्य लिखितं पंडित जीवराज द्वितीय शिष्य पं० ईसर स्वहस्तेन ।

अथ संवत्सरेऽस्मिन् विक्रमादित्यराज्यात् संवत १८२५ वर्षे मार्गशिरमासे शुक्लपक्षे अष्टम्यां तिथौ शनिवासरे श्री मूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्री कुंदकुंदाचार्यान्वये भट्टारक जी श्री चन्द्रकीर्त्ति जी तदाम्नाये खंडेवालान्वये नागपुरवास्तव्ये महाराजाधिराज राजराजेश्वर महाराजा श्री विजयसिंह जी राज्यप्रवर्त्तमाने पाटणी गोत्रे साहजी श्री हीरानंदजी तस्य भार्या हीरादे तत्पुत्र सा० टकुंदास भार्या तिलकादे । तत्पुत्र सा० जीवराज तस्य भार्या जिणादे तयो पुत्राः त्रयः । प्रथम पुत्रा सा० ईसरदास

द्वितीय सा० कपूरचंद तस्य भार्या कपुरादे तस्य पुत्राश्चत्वारः । प्रथम पुत्र सा० बधूराम भार्या बोहरंगदे द्वितीय पुत्र सा० जीवणराम तस्य भार्या जिणादे तृतीय पुत्र सा० कचरदास तस्य भार्या कचरादे चतुर्थ पुत्र सा० गुलाबचंद तस्य भार्या गुलाबदे । तृतीय पुत्र सा० डालुराम तस्य भार्या डालमदे तयोः पुत्रौ द्वौ । प्रथम पुत्र सा० चूहड तस्य भार्या चूहडदे द्वितीय पुत्र सा० फतेचंद तस्य भार्या फतमलदे । सा० मनुजी तस्य भार्या मानादे तयो पुत्रा सा० भावुजी तस्य भार्या भावलदे तयोः पुत्रौ द्वौ प्रथम पुत्र रूपचन्द तस्य भार्या रूपलदे द्वितीय पुत्र रामचंद । सा० कचरदास जी तस्य भार्या कचरादे तयोः पुत्राः साह रिषभदास भार्या रिषभादे । साह गुलाबचंद तत्पुत्र सा० भिलाजी भार्या भिलादे तयोः पुत्राश्चत्वारः । प्रथम पुत्र मोतीराम द्वितीय पुत्र माणिकचंद तृतीय पुत्र नैणचंद चतुर्थपुत्र दोलतराम । साह फतेहचंद तत्पुत्र मयाराम एतेषां मध्ये जिनपूजापुरंदरान् संघभार धुरंधुरान् जिनचैत्यालययात्राप्रतिष्ठाकरणसमर्थान् द्वादशव्रतप्रतिपालकान् सद्गुरुपदेशनिर्व्वाहकान् साहजी श्री रिषभदासजी इदं शास्त्रं सकलपुराणाख्यं लिखाप्य स्वज्ञानावरणीकर्मक्षय निमित्तं सत्पात्रा आचार्यवर्य श्री १०८ श्री क्षेमकीर्त्तये प्रदत्तं ॥

३०. भक्तामरस्तोत्र वृत्ति ।

वृत्तिकार श्री गुणसुंदर । भाषा संस्कृत । पत्र संख्या २८. साइज १०।।×४।। इञ्च । प्रत्येक पृष्ठ पर १७ पंक्तियां तथा प्रति पंक्ति में ५३–५५ अक्षर । लिपि संवत् १४२६. लिपि संवत् १६५४. श्री गुणसुंदर आचार्य गुणचन्द्रसूरि के प्रमुख शिष्य थे । इनका दूसरा नाम गुणाकरसूरि भी है ।

वृत्तिकार की प्रशस्ति—

श्रीचंद्रगच्छेऽभयसूरिवंशे श्रीरुद्रपल्लीयगणाब्धिचंद्राः ।
श्रीचंद्रसूरिप्रवराबभुस्ते येभ्रातरः श्रीविमलेंदुसंज्ञाः ॥ १ ॥
तत्पट्टे जिनभद्रसूरिगुरवः संलब्धलब्धप्रभाः ।
सिद्धांताम्बुधिकुंभसंभवनिलाः प्रख्यातमन पां शुभाः ॥ २ ॥
जातः श्रीगुणशेखराभिधगुरुस्तस्मात्सपोनिर्म्मलः ।
शीलः श्रीतिलकोजगत्तिलक इत्य······प्रणाः ॥ ३ ॥
सद्ध्वंसकविः कवित्वध्याता चारित्रचारुकरुणाः करुणास्तकामः ।
तत्पट्टभूषणमणिर्गतदूषणोऽभूत श्रमाम मुनींद्र गुणचंद्र गुरुर्गरिष्ठा ॥ ४ ॥
संप्रत्य·········निर्देशाभयदेव सूरीणां ।
गुणचंद्रसूरिशिष्यागुणसुन्दरवाचकोल्पे मतिः ॥ ५ ॥
वर्षे षड्विंशाधिकचतुर्द्दशशती मितेत्रपर्क्तौ ।
आश्विनमासे रचिवामरस्त्रपत्तनिवृत्तिः ॥ ६ ॥
× × × × × ×
इति श्री भक्तामरवृहत् वृत्ति समाप्ता ।

संवत् १६५४ वर्षे कार्त्तिक शुक्लचतुर्दश्यां लिखितं साकंडानगर मध्ये।

३१. भक्तामरस्तोत्र वृत्ति।

वृत्तिकार ब्रह्म श्रीरायमल्ल। भाषा संस्कृत। पत्र संख्या ३५. साइज ११॥×६॥ इञ्च। प्रत्येक पृष्ठ पर १४ पंक्तियां तथा प्रति पंक्ति में ३५-३८ अक्षर। टीका काल संवत् १८६७ लिपि संवत् १६६८. वृत्तिकार की प्रशस्ति—

श्रीमद् हूंबडवंशमंडणमणिर्मह्योयेति नामा वणिक्,
तद्भार्या गुणमंडिता व्रतयुता चांपामितीताभिधा।
तत्पुत्रो जिनपादपंकजमधुपो रायादिमल्लो व्रती
चक्रे वृत्तिमिमां स्तवस्य नितरां नत्वा श्रीवादींदुकं॥ १॥
सप्तषष्ट्यधिके वर्षे षोडशाख्ये (१६६७) हि संवति।
आषाढश्वेतपक्षस्य पंचम्यां बुधवासरे॥ २॥
ग्रीवापुरे महीसिंधो स्तटभागंसमाश्रिते।
प्रोत्तुंगदुर्गसंयुक्ते श्रीचन्द्रप्रभसद्मनि॥ ४॥
वर्णिनः कर्मसीनाम्नः वचनात् मयकारिच।
भक्तामरस्य सद्वृत्तः रायमल्लेन वर्णिना॥ ४॥
इति श्री ब्रह्मरायमल्लेन विरचिता भक्तामरस्तोत्र वृत्तिः समाप्ता

संवत् १६६८ वर्षे कार्त्तिक बुदी १३ शनिवारे श्री काष्ठासंघे नंदीतटगच्छे विद्यागणे भट्टारक श्री रामसेनान्वये तदनुक्रमेण भट्टारक श्री विद्याभूषण तत्पट्टे भट्टारक श्रीभूषण तत्पट्टे भट्टारक श्री चंद्रकीर्त्ति तत्पट्टाभरण श्री भट्टारक श्री राजकीर्त्ति तत्पट्टाभरण भट्टारक श्री लक्ष्मीसेन विजयराज्ये भट्टारक श्री राजकीर्त्ति तत् शिष्य ब्रह्म श्री कल्याणसागरस्य पठनार्थं।

३२. भक्तामरस्तोत्र वृत्ति।

वृत्तिकार श्री अमरप्रभसूरि। भाषा संस्कृत। पत्र संख्या १८. साइज १०॥×४॥ इञ्च। प्रत्येक पृष्ठ ११ पंक्तियां तथा प्रति पंक्ति में ३४-३८ अक्षर।

मंगलाचरण—

अज्ञानतिमिरांधानां ज्ञानांजनशलाकया।
नेत्रोन्मुनिमीलतेजेन तस्मै श्री गुरुवे नमः॥

प्रशस्ति—

श्रीअमरप्रभसूरिणां वैदुष्यगुणभूषिताः।
भक्तामरस्तवीवृत्ति प्रकापुः सुखबोधिकां॥ १॥

संवत् १६३६ माघ सुदी २ सोमवासरे लिखापितं पंडित शिरोमणि केसोदास आपज्ञोम्यपठनार्थं लिख्यते कायस्थ पूरनमल माथुरान्वये।

संवत् १६६५ पौष सुदी ११ बृहस्पतिवासरे शेरपुर वास्तव्ये श्रीपार्श्वनाथचैत्यालये महाराजा श्रीजगन्नाथराज्ये श्रीमूलसंघे नंद्याम्नाये ····· भट्टारक श्रीपद्मनन्दिदेवा स्तत्पट्टे भट्टारक श्रीदेवेन्द्रकीर्तिस्तदाम्नाये खंडेलवालान्वये सौगणी गोत्रे सा० सांगा तद्भार्ये प्र० सिंगारदे द्वि० लाडमदे तयोः पुत्रौ द्वौ प्र० सा० नांदा तद्भार्ये द्वे प्र० नारंगदे द्वि० न्हौडी तयोः पुत्राः चत्वार: प्रथम सा० टीला तद्भार्या त्रिभुवनदे। द्वि० सा० मोहन चि० गूजर एतेषां मध्ये सा० नांदा तद्भार्या नारिंगदे इदं शास्त्रं देवशास्त्रगुरुभक्तितया भट्टारक श्री देवेन्द्रकीर्त्तये प्रदत्तं।

३३. भोजप्रबन्ध।

रचयिता श्री रत्नमन्दिर गणि। भाषा संस्कृत। पत्र संख्या ७२. साइज १२×५।। इञ्च। ग्रन्थ पद्य संख्या ३३३१. रचना संवत् १५१७. लिपि संवत् १८०५. ग्रन्थ प्रकाशित हो चुका है।

मंगलाचर—

ॐकारः कल्पकारस्करनिकरतिरस्कारिदानातिरेकः,
शब्दब्रह्मैकरत्नाकरहिमकिरणः कारणं मंगलानां।
देयाद्वः शुद्धबुद्धिं निरवधिमहिमांमभोनिधिः,
श्रीअर्हत्सिद्धाचार्योपाध्यायसाधूनभिदधद् धर्क धीमदाराधनीयः ।।१।।

प्रशस्ति—

भोजे प्रबन्धराजेऽस्मिन् रत्नमंदिरलेखिते।
कवीश्वरकृतानंदोऽधिकारः सप्तमोऽभवन् ।। १ ।।
ज्ञातः श्री गुरुसोमसुन्दरगुरुश्रीमत्तपागच्छप,
स्तत्पादांबुजषट्पदो विजयते श्रीनंदिरत्नगणी।
तत्र शिष्योस्ति च रत्नमंदिरगणी भोजप्रबंधोऽद्भुत,
स्तेनासौ मुनिर्भूमिभूतशशिमृत् १५१७ संवत्सरे निर्मितः ।। २ ।।

संवत् १८०५ वर्षे मिती चैत सुदी ११ तिथौ लिखितं जती प्रयागदासेन।

३४. महावीर पुराण।

रचयिता महापंडित श्री आशाधर। भाषा संस्कृत। पत्र संख्या ३६. साइज १०।।×४ इञ्च। प्रत्येक पृष्ठ पर ९ पंक्तियां तथा प्रति पंक्ति में २८-३० अक्षर।

मंगलाचार—

वीरं नत्वेंद्रभूतिं च त्रिषष्ठिश्रेष्ठपुंश्रितं ।
इति वृत्तं ब्रुवे स्मृत्यै समासेन यथागमं ।। १ ।।

प्रशस्ति —

सोऽहमाशाधरः कंठमलं कर्तुं सधर्मणां ।
पंजिकालं कृतं ग्रंथमिमं पुण्यमरीरचं ।। १ ।।
× × × × × ×
संक्षिप्यतां पुराणानि नित्यस्वाध्यायसिद्धये ।
इति पंडितजाजाकिद्धप्रि प्रेरिकात्र ये ।।
× × × × × ×
प्रमारवंशवार्द्धींदु देवपालनृपात्मजे ।
श्रीम ······· देव सिस्थाम्नावंतीमवत्यलं ।।
नलकच्छपुरे श्रीमान्नेमिचैत्यालयेसिधत् ।
ग्रंथो संक्षिनवंचेक विक्रमार्क समात्यये ।।
खण्डिलां वंशे महनकमलश्रीसुतः सुहृक् ।
धीनाको वर्द्धतां येन लिखिता स्याद्य पुस्तिका ।।

३५. महीपालचरित्र ।

रचयिता श्री चारित्रसुन्दरगणि । भाषा संस्कृत । पत्र संख्या ३३. साइज १०×४ इञ्च । प्रत्येक पृष्ठ पर १० पंक्तियां तथा प्रति पंक्ति में ४५–५० अक्षर । रचना संवत् १५२५ के आप पास । लिपि संवत् १८२५. ग्रन्थ जामनगर से प्रकाशित हो चुका है ।

प्रारम्भिक पाठ—

यस्यांशदेशे शतकुंतलाली, दूर्वांकुरालीव विभाति नीला ।
कल्याणलक्ष्मी वसतिः सदिश्यादादीश्वरो मंगलमालिकां वः ।।
यस्यांक्रमोपास्तिवशाज्जडोपि, विना श्रमं वाङ्मयपारमेति ।
सदा चिदानंदमयस्वरूपा सा सारदा पातु रतिपरां मे ।।

अन्तिम पाठ तथा प्रशस्ति—

महीपालस्यैवं चरितमिदमुच्चैस्समयं,
मया प्रोचे पुण्यातिशयविशदं शश्वदधिया ।
प्रसादेन श्रीमज्जिनवरपतेश्चापि सुगुरोश्च,
नंद्यादे तद् भुवि कविजनानंदजनकं ।। १ ।।

नित्यं सच्छुल्कपक्षस्थितिरिति विशदो नाशितो स्यामपक्षो,
विध्वस्ताशेषदोषो बहुमुनिसहितो भूरिशोभाभिरामः।
विश्वाल्हादं ददानो हतनिखिलतमाः शश्वदाप्तोदयोत्र,
श्रीमद्गोपरविधुवदयं राजते शुद्धवृत्तः॥
कल्याणबलिशालिनोत्रसुमनः श्रेणीभितो विभ्रतः,
श्रीमान् वृद्धतपोगणो विजयतेऽयंमेरुबलिश्रलः।
विश्वालंकरणस्य विस्तृतजुषः सन्नंदनस्यान्वहं,
भां विस्फाति युतस्य यस्य पुरतः पादा इवान्ये गणाः॥ ३॥
तस्मिन् विस्मयकारि चारुचरितं चारित्रचूडामणिः,
श्रीमान श्रीविजयेंद्रसूरिरभवद् भव्यांगचिंतामणिः।
तत्पट्टे समभून्महींद्रमहितः श्रीक्षेमकीर्त्तिगुरुः,
कारकाग्रोविबुधान् धिनोति नितरां यत्कालवृत्तिस्तथा॥ ४॥
श्री रत्नाकरसूरय समभवन् ज्ञानांबुरत्नाकराः,
कीर्त्तिस्फीतिमनोहराशुभगुणश्रेणीलतांभोधर।
यस्माम्नात्र तयो गणो यमभवद्ररत्नाकराख्यांपरां,
ख्यातेन क्षिति मंडलेऽपिसकले सत्यां तमो हारिणाः॥ ५॥
तस्यानुक्रमपूर्वशैलतरणिः कामद्विपोघत्सृणिः,
सूरीशोभयसिंह इत्यजनिसद्योगींद्रचूडामणिः।
तत्पट्टे प्रकटप्रभाव विदितो विध्वस्तवादिघृणिः,
जज्ञे श्री जयपुंदूसूरिरसमो भव्यात्मचिंतामणिः॥ ६॥
कीर्त्तिर्यस्य निरन्तापनिवहासच्छीलदंडस्थिता,
चंचच्चंद्रकलोज्वलादशदिशां श्वेतातपत्रापते।
तत्पट्टे स्फुटवादिकुंजरघटा सिंहो हृदंहोव्रजः,
सूरींद्रो जयताच्चिरं गणधरः श्री रत्नसिंहाभिधः॥ ७॥
तस्यानेकविनेयसेवतपदांभोजभव्यावली,
चंचन्नेत्रचकोरचंद्रसदृशास्याम्नत्रभूमीपतेः।
शिष्याणूरचयांचकार चतुरश्चारित्ररम्याभिधो,
विश्वाश्चर्यकरं महीपचरितं नानाविचारोद्धरं॥ ८॥
श्री रत्नसिंहगुरुपादशिरोरुहाक्षि-
श्चारित्रसुंदरकवि चरित्रं ततान।

तस्मिन् महीपचरिते भवबर्णनाख्य,

सर्गः समाप्तिमगमत् किल पंचमोयं ॥ ६ ॥

इति भट्टारक श्री रत्नसिंहसूरि शिष्यमहोपाध्याय श्री चारित्रसुंदरगणिविरचिते श्री महीपालचरिते आ काव्ये पंचमः सर्गः। संवत् १८२५ तपसि मासे कृष्णपक्षे कर्म्मवाट्यां जयादे मध्ये पूर्णो कृतम्। टोंकनगर-मध्ये लिखिता अती पूरणचन्द्रेण लिखापिता त्रिवृत् सुखरामजी पठनार्थे।

३६. मुनिसुव्रतपुराण।

रचयिता ब्रह्म श्रीकृष्णदास। भाषा संस्कृत। पत्र संख्या ११६. साइज १२×५॥ इञ्च। प्रत्येक पृष्ठ पर १२ पंक्तियां तथा प्रति पंक्ति में ४३-४७ अक्षर। रचना संवत् १६८१. लिपि संवत् १८५०. पुराण अभी तक अप्रकाशित है।

मंगलाचरण—

देवेन्द्रार्चितसत्पादपंकजं प्रणमाम्यहं।

आदीश्वरजगन्नाथं सृष्टिधर्म्मकरं भुवि ॥ १ ॥

अन्तिमपाठ प्रशस्ति—

काष्ठासंघे वरिष्ठेऽजनिमुनिपनुतो रामसेनोभदंत,

स्तत्पादांभोजसेवाकृतविमलमतिः श्रीभीमसेनः क्रमेण।

तत्पट्टे सोमकीर्त्तिर्भवनपतिकरांभोजसंपूजितांह्रि,

रेतत्पट्टोदयाद्रौ जिनचरणलयीश्रीयशः कीर्त्तिरेनः ॥ १ ॥

कमलपतिरिवाभूच्चयुदयाचलतंसेन,

उदितविशदपट्टे सूर्यशैलेन तुल्ये।

त्रिभुवनपतिनाथांह्रिद्वयाशक्तचेत,

स्त्रिभुवनजनकीर्त्तिर्नामतत्पट्टधारी ॥ २ ॥

रत्नभूषणभदंत······न्यायनाटकपुराणसुविधः :

वादिकुंजरघटाकटसिंहस्तत्पट्टेऽजनिरंजनभक्तः ॥ ३ ॥

देवतानिकरसेवितपाद श्रीवृषेशविभुपादप्रसान्।

कोमलेन मनसा कृत एष ग्रंथ एव विदुषां हृदिहारः ॥ ४ ॥

सोधयंतु विबुधाविविरोधामत्पुराणमदएवमनोज्ञं।

संभवंति सुजनाः खलु भूमौ ते सदा हितकराहतपापाः ॥ ५ ॥

········ऽब्द वर्षे १६८१ श्री कीर्त्तिकाख्ये।

धवले च पक्षे श्रीमे त्रयोदश्यपराह्नयामे कृष्णेन सौख्याय विनिर्मितोऽयं ॥ ६ ॥

लोहपत्तननिवासमहेभ्यो हर्ष एव वणिजामिव हर्षः ।
तत्सुतः कविविधः कमनीयो भातिमंगलसहोदरकृष्णः ॥ ७ ॥
श्रीकल्पवल्लीनगरे गरिष्ठे श्रीब्रह्मचारीश्वर एव कृष्णः ।
कंठावलं व्यूर्जितपूरमल्लः प्रवर्द्धमानोहितमाततान ॥ ८ ॥
पंचविंशतिसंयुक्तं सहस्त्रत्रयमुत्तमं ।
श्लोकसंख्येतिनिर्दिष्टाकृष्णेन कविवेधसा ॥ ६ ॥

इति श्रीपुण्यचंद्रोदयमुनिसुव्रतपुराणे श्रीपूरमल्लांके हर्षवीरिकादेहज ब्रह्मश्री मंगलदासात्मज ब्रह्मचारीश्वरकृष्णदासविरचिते रामदेवशिवगमनं त्रयोविंशतितमः सर्गः समाप्तः । संवत् १८५० का पोषमासे शुक्लपक्षे तिथौ १ गुरुवासरे लिखित महात्मा संभूराम ॥

संवत्सरे शून्यशराष्टेंदु १८५० मिते पोषमासे शुक्लपक्षे पंचम्यांतिथौ चन्द्रवासरे ढूंढाहडदेशे सवाईजयपुरनगरे श्री वृषभदेवचैत्यालये श्री मूलसंघे नंद्याम्नाये बलात्कारगणे कुंदकुंदाचार्यान्वये श्रीमतो-पट्टे भट्टारकशिरोरत्न श्रीमहेन्द्रकीर्त्ति देवास्तत्पट्टे भट्टारक पट्टोदयाद्रिदिनमणिनभश्रीमत्क्षेमेन्द्रकीर्त्तिदेवस्त-त्पट्टांभोजमार्त्तण्डचण्डोद्योतितपरवादिभपंचानभट्टारकश्रीसुरेन्द्रकीर्त्तिस्तदाम्नायेखंडेलवालान्वये पाटणीगोत्रे-षोधूव्योंकशिरोमणि साहश्रीसंतोषरामः तद्भार्या संतोषसुखदे तत्पुत्रचिरंजीव श्रीधर्मधुरंधर बधूरामजी तद्भार्या वधूदे तत्पुत्र चिरंजीविश्रीमोहनलाल एतेषां मध्ये दानपूजाव्रतशीलप्रभावक श्रावकधर्मक्रियापरायण-चिरजीविश्रीबधूरामेणेदं मुनिसुव्रत पुराणं लिखाप्य निजज्ञानवरणीकर्मक्षयार्थं भट्टारक श्रीसुरेन्द्रकीर्त्तये घटापितं ॥

३७. मेघदूतावचूरि ।

टीकाकार श्री सुमतिविजय । भाषा संस्कृत । पत्र संख्या ३०. साइज ६।×४ इञ्च । प्रत्येक पृष्ठ पर १६ पंक्तियां तथा प्रति पंक्ति में ४६–४८ अक्षर । लिपि संवत् १७५१.

टीकाकार का मंगलाचरण—

शारदां च गुरुं नत्वा मेघदूतावचूरिका ।
सुमतिविजयनेयं क्रियते सुगमत्वया ॥ १ ॥

प्रशस्ति—

राजरंजनदक्षाश्च पाठकाः मुनिमंडले ।
जीयाः सुधीः घनाः शाश्वत् श्रीमद्विनयमे रवः ॥ १ ॥
सुमतिविजयेनेयं विहता सुगमत्वया—
वचूरिः शिशुबोधार्थं तेषां शिष्येण धीमता ॥ २ ॥
विक्रमाख्ये पुरे रम्येऽभीष्ट देव प्रसादतः ।
मेघावृताभिधानस्य पूर्णाकाव्यस्य सौख्यदा ॥ ३ ॥

३८. मेघदूत टीका ।

टीकाकार श्रीमेघराज । भाषा संस्कृत । पत्र संख्या ४४. साइज १०×४।। इञ्च । प्रत्येक पृष्ठ पर १५ पंक्तियां तथा प्रति पंक्ति में ४०–४४ अक्षर ।

टीकाकार का मंगलाचरण—

नत्वाहं परमात्मानं सर्वातिशयसंयुतं ।
मेघदूतस्य काव्यस्य कुर्वे टीकां सुबोधिकां ॥ १ ॥

अन्तिम समाप्ति—

इति श्री कालिदासकृतं मेघदूतकाव्यं तस्य सुखबोधिका नाम्नी टीका वृत्तिः समाप्ता ।

संवद्वह्निवसुमुनींदुवत्सरे वैशाखबहुलनवम्यां तिथौ कविवासरे श्रीपार्श्वचंद्रसूरिगच्छे महोपाध्याय श्री १०८ श्री हीरानंद चंद्रास्तेषां शिष्यामहोपाध्यायाः श्रीरामचंद्रास्तच्छिष्य श्रीअखयराजजी तच्छिष्य श्रीलालचंद्रजी तच्छिष्य मुनिरत्नचंद्रेणेयं लिखिता ॥

३६. यशोधर चरित्र ।

रचयिता श्री ज्ञानकीर्त्ति । भाषा संस्कृत । पत्र संख्या ६८. साइज १२×५ इञ्च । प्रत्येक पृष्ठ पर ६ पंक्तियां तथा प्रति पंक्ति में ३३–३७ अक्षर । प्रति पूर्ण तथा सुन्दर है ।

मंगलाचरण—

श्रीमन्नाभिसुतो जीयाज्जिनो विजितदुर्नयः ।
मंगलार्थं नतो वस्तु सर्वदा मंगलप्रदः ॥

अन्तिम पाठ तथा प्रशस्ति—

चंपादिपुर्याः सविधे सुदेशे बंगाभिधा सुन्दरतां दधाने ।
स्य ते पुरेऽकब्बुरनामके च चैत्यालये श्री पुरुतीर्थं यस्य ॥
श्री मूलसंघे च सरस्वतीति गच्छे बलात्कारगणे प्रसिद्धे ।
श्री कुन्दकुन्दान्वयके यतीशः श्री वादिभूषो जयतीह लोके ॥ २ ॥
तद्गुरुबंधुर्भुवनसमर्च्यः पंकयकीर्त्ति परमपवित्रः ।
सूरिपदाप्तो मदनविमुक्तः सद्गुणराशि र्जयतु चिरं सः ॥ ३ ॥
शिष्यस्तयोर्ज्ञानसुकीर्त्तिनामा श्री सूरिरप्यल्पसुशास्त्रवेत्ता ।
चरित्रमेतद्रचितं च तेनाचंद्रार्ककंता रंजयताद्धरित्र्यां ॥ ४ ॥
शते षोडशएकोन षष्टिवत्सरके शुभे ।
माघे शुक्ले प पंचम्यां रचितं भृगुवासरे ॥ ५ ॥
राजाधिराजोऽत्र तदा विभाति श्री मानसिंहोजित वैरिवर्गः ।

अनेकराजेन्द्रविनम्यपादः स्वदानसंतर्पितविश्वलोकः ॥ ६ ॥
प्रतापसूर्यस्तपतीह यस्य द्विषां शिरस्सु प्रविधायपादं ।
अन्याय दुर्ध्वांत मपास्यदूरं पद्माकरं यः प्रविकाशयेच्च ॥ ७ ॥
तस्यैव राज्ञाऽस्ति महानमात्यो नानू सुनामा विदितो धरित्र्यां ।
समेदशृंगे च जिनेन्द्रगेहमष्टापदेवादिमचक्रधारी ॥ ८ ॥
योकारयच्चत्र च तीर्थनाथाः सिद्धिंगता विंशतिमानयुक्ताः ।
यः कारयेन्नित्यमनेक संध्यायात्रांधनाद्यैः परमां च तस्या ॥ ९ ॥
तत्प्रार्थना च संप्राप्य जयवर्तबुधस्य च ।
आमहाद्रचितं चैतच्चरित्रं जयतां चिरं ॥ १० ॥
श्री व रदेवोस्तु शिवायते हि श्री पद्मकीत्तिष्ट विधायको यः ।
श्री ज्ञानकीर्त्ति प्रविवंद्य पादो नानू स्वकर्मणयुतस्य नित्यं ॥ ११ ॥

इति श्री यशोधरमहाराज चरिते भट्टारक श्री वादिभूषण शिष्याचार्य श्री ज्ञानकीर्त्ति विरचिते राजाधिराज महाराजमानसिंह प्रधान साह श्री नानूनामांकिते भट्टारक श्री अभयरुच्यादि दीक्षाग्रहण स्वर्गादिप्राप्तिवर्णनो नाम नवमः सर्गः ॥

संवत् १६६१ श्रावणमासे कृष्णमासे द्वितीयातिथौ कुजवासरे वंगदेशे अकबरनगरे राजाधिराज श्री मानसिंह राज्यप्रवर्त्तमाने श्री पार्श्वनाथचैत्यालये श्री मूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्री कुंदकुंदाचार्यान्वये भट्टारक श्री पद्मनंदिदेवा स्तत्पट्टे भट्टारक श्री शुभचन्द्रदेवास्तत्पट्टे भट्टारक श्री जिनचंद्रदेवास्तत्पट्टे भट्टारक श्री प्रभाचंद्रदेवा तत्पट्टे भट्टारक श्री चन्द्रकीर्त्तिस्तदाम्नाये खंडेलवालान्वये गोधा गोत्रे साह श्री याचकजनसंदोह कल्पवृक्ष श्रावकाचारचरणनिरतचित्तः साह श्री चाचा तस्य भार्या चांसरदे तयोः पुत्रस्त्रयः प्रथमपुत्र साह नेमा तस्य भार्या निमलदे तस्य पुत्र साह वल्लू तस्य भार्या वालहदे द्वितीय पुत्र साह खेमा तस्य भार्या खेमलदे तस्य पुत्र चि० कल्लू तस्य भार्या कौतुकदे तस्य पुत्र चि० दुर्गा तस्य भार्या दुर्गादे तृतीय पुत्र साह श्री पंचाईण तस्य भार्या द्वे प्रथमभार्या पाटमदे द्वितीय भार्या भावलदे । प्रथम भार्या स्वपतिछंदानुगामिनी शीलालंकृतगात्राः सध्वी पाटमदे तयो पुत्र प्रथम दानगुणश्रेयांस सकलजन नंदकारकस्ववचनप्रतिपालन समर्थसर्वोपकारक साह श्री नाथू तद्भार्या नारंगदे तयो पुत्र चत्वार प्रथम पुत्र चि० डूंगरसी तस्य भार्या कोडमदे द्वि० पुत्र चि० मोहनदास तृतीय पुत्र चि० नारायणदास चतुर्थ पुत्र चि० ऋषभदास । साह श्री पंचाईण तस्य भार्या द्वितीय भावलदे तयो पुत्राश्चत्वारः देवशास्त्रगुरुभक्ततत्परान् नयविनयविवेकविचारचातुरीचमत्कृतनरनिकरान् श्री जिनपूजापुरंदरान राजासभाशृंगारहारन् प्रथमपुत्रसाह श्री हरषा तद्भार्ये द्वे प्रथमभार्या हरषमदे तस्य पुत्र चि० प्रयागदास तद्भार्या दाडिमदे साह श्री हरषा तस्य द्वितीय भार्या प्रतापदे साह श्री पंचाइण तस्य तृतीय पुत्र साह श्री हीरा तस्य भार्या हमीरदे । साह

श्री पंचाइण तस्य चतुर्थपुत्र मानू तस्य भार्या महिमादे । तस्य पंचम पुत्र चि० केसोदास तस्य भार्या कस्मीरदे एतेषां मध्ये स्वकुलाकाशप्रकाशनचंद्र सज्जनजनचकोरचक्षु चंद्रमंडल श्रीभगवन् मुखोद्गत प्रवचन श्रद्धामृत पानसंछर्दितानादिकाल।नमिथ्यात्वमहागरल साह श्री नाथू तेनेदं यशोधरचरित्रं लिखाप्य भट्टारक श्री चंद्रकीर्त्ति तस्य शिष्य आचार्य श्री शुभचंद्राय दत्तं कर्मक्षयनिमित्तं ।

४०. यशोधर चरित्र ।

रचयिता कायस्थ श्री पद्मनाभ । भाषा संस्कृत । पत्र संख्या ८६. साइज ६×४ इञ्च । प्रत्येक पृष्ठ पर ६ पंक्तियां तथा प्रति पंक्ति में ३०-३४ अक्षर । लिपि संवत १७६६. यशोधर चरित्र अभी तक प्रकाशित नहीं हुआ है ।

मंगलाचरण—

परमानंद जननीं भवसागर तारिणीं ।
सतां वितनुतां ज्ञानलक्ष्मीचन्द्रप्रभप्रभुः ॥ १ ॥

अन्तिम पाठ—

उपदेशेन ग्रन्थोऽयं गुणकीर्त्तिमहामुनेः ।
कायस्थ पद्मनाभेन रचितः पूर्व सूत्रतः ।
सतोष जैसवालेन संतुष्टेन प्रमोदिना ।
अतिश्लाघितो ग्रंथो यमर्थं संग्रहकारिणा ॥ २ ॥
साधोर्विजयसिंहस्य जैसवालान्वयस्य च ।
सुनेन पृथ्वीराजेन ग्रन्थोऽयमनुमोदितः ॥ ३ ॥

इति श्री यशोधरचरित्रे दयासुंदराभिधाने महाकाव्ये साधु श्री कुशराजकारापिते कायस्थ श्री पद्मनाभविरचिते अभयरुचिप्रभृति सर्वेषां स्वर्गगमनो नाम नवमः सर्गः ॥

प्रशस्ति —

जातः श्री वीरसिंहः सकलरिपुकुलव्रातनिर्घातपातो,
वंशे श्री तोमराणां निजविमलयशो व्याप्तदिक्चक्रवालः ।
दानैर्मानैर्विवेकै न भवति समता येन साकं नृपाणां ।
केषामेषा कवीणां प्रभवति धिषणां वर्णने तद्गुणानां ॥ १ ॥
ईश्वरचूडारत्नं विनिहत करघातवृत्तसंघातः ।
चंद्र इव दुग्ध सिंधोस्तस्मादुद्धरणभूपशुचीयते तिमिरं ॥ २ ॥
यस्य हि नृपते यशसा सहसाशुभ्रीकृत त्रिभुवनेऽस्मिन् ।

कैलाशे 'ति' गिरि निकरः क्षीरति नीरं शुचीयते तिमरं ॥ ३ ॥
तत्पुत्रो वीरमेंद्रः सकलवसुमती पाल चूडामणिर्यः।
प्रख्यातः सर्वलोके सकलवसुकलानंदकारीविशेषात् ॥
तस्मिन् भूपाल रत्ने निखिलनिधिगृहे गोपदुर्गेप्रसिद्धे,
भुंजानेः प्राज्यराज्यं विगतरिपुभयं सुप्रजः सेव्यमानः ॥ ४ ॥
वंशेऽभूज्जैसवाले विमलगुणनिधिः भूलणः साधुरत्नं,
साधु श्री जैनपालो भवदुदियास्तत्सुतोदानशीलो।
जैनेंद्राराधनेषु प्रमुदितहृदयः सेवकः सद्गुरूणां.
लोणाख्या सत्यशीला जनिविमलमतिर्ज्जैणपालस्य भार्या ॥ ५ ॥
जाता षट् तनया स्तयोः सुकृतिनो श्री हंसराजोऽभव-
त्तेषामाद्यतमस्तदनुजः सैराजनामाजनि।
रैराजो भव राजकः समजनि प्रख्यातकीर्तिमहान्,
साधु श्री कुशराजकस्तदनुज श्रो चेनराजोलघु ॥ ६ ॥
ज्ञाता श्री कुशराज एव सकल क्ष्मापाल चूडामणिः,
श्रीमत्तोनरवीरमस्य विदितो विश्वासपात्रं महान्।
मंत्री मंत्रविचक्षणः क्षणमयः क्षीणारिपक्षः क्षणात्,
क्षोण्यामीक्षणरक्षणक्षणमति जैनेंद्रपूजारतः ॥ ७ ॥
स्वर्गस्पर्द्धि समृद्धि कोति विमलश्चैत्यालयः कारितो,
लोकानां हृदयंगमो बहुधनैश्चन्द्रप्रभस्यप्रभोः।
येनैतत्समकालमेव रुचिरं भव्यं च काव्यं तथा,
साधु श्री कुशराजकेन सुधिया कीर्तिश्चिरस्थापकं ॥ ८ ॥
तिस्रास्तस्यैव भार्या गुणचरितयुपस्तासु रल्होभिधाना,
पत्नी धन्या चरित्रा व्रतनियमयुता शीलशौचेनयुक्ता।
दात्री देवार्चनाढ्या गृहकृतिकुशला तत्सुतः कामरूपो,
दाता कल्याणसिंह जिनगुरुचरणाराधनेतत्परोभूत् ॥ ९ ॥
लक्षणा श्रीर्द्वितीयाभूत सुशीला च पतिव्रता।
कौशीरा च तृतीयेयमभूद्गुणवती सती ॥ १० ॥
शांतिर्दस्तुभूयात्तदनु नरपते सुप्रजानां जनानां।
वक्तॄणां वाचकानां प्रतिदिनमधिकं कर्तृकारापितानां।

श्रोतृणां लेखकानां बहुविमलधियां द्रव्यविख्यापकानां।
तद्वत्श्रद्धापराणां विविधबहुमतैं श्रावकानां तथैव॥ ११॥
कायस्थपद्मनाभेन बुधपादाब्जरेणुना।
कृतिरेषा विजयतां स्थेयादाचंद्रतारकं॥ १२॥

४१. यशोधर चरित्र।

रचयिता भट्टारक श्री सकलकीर्त्ति। भाषा संस्कृत। पत्र संख्या ७४. साइज १२×४॥ इञ्च। प्रत्येक पृष्ठ पर ७ पंक्तियां तथा प्रति पंक्ति में ३८-४२ अक्षर। ग्रन्थ पूर्ण है। लेकिन दीमक लग जाने से फट गया है। उक्त चरित्र प्रकाशित नहीं हुआ है।

प्रशस्ति—

संवत् १६३० वर्षे आषाढ सुदी २ सोमवासरे श्री मूलसंघे सरस्वतीगच्छे बलात्कारगणे भट्टारक श्री कुन्दकुन्दाचार्यः। तदन्वये भट्टारक श्री जिनचन्द्रः। तत्पट्टे भट्टारक श्री प्रभाचंद्रः। तत्पट्टे मंडलाचार्य श्री धर्मचन्द्रः। तत्पट्टे मंडलाचार्य श्री ललितकीर्त्ति। तत्पट्टे मंडलाचार्य श्री चन्द्रकीर्त्तिः। तदाम्नाये खंडेलवाल पाटणी गोत्रे संगही दूलहा भार्या दूलहदे। तयो पुत्र सं० हीरा द्वितीय पुत्र सं० ठकुरसी तत् भार्या लखणा। तयो पुत्र सं० ईसर भार्या ईसरदे तयोः पुत्र सं० रूपसी देवसी सं० सेवा भार्या साहिबदे तयोः पुत्र मानसिंह सं० गुणदत्त भार्या गौवादे तयोः पुत्र सं० गेगा स० प्रमत् सं० रेखा सं० ठकुरसी भार्या लखणा शास्त्र यशोधर चरित्र ब्रह्मरायमल्ल जोग्य दद्यात्।

४२. योगचिंतामणि।

रचयिता श्री हर्षकीर्त्ति। भाषा संस्कृत। पत्र संख्या ६०. साइज १०×४॥ इञ्च। प्रत्येक पृष्ठ पर १५ पंक्तियां तथा प्रति पंक्ति में ४८-५४ अक्षर। विषय-वैद्यक। ग्रन्थ का दूसरा नाम वैद्यक सार संग्रह भी है।

मंगलाचरण—

यत्र वित्रासमयांति तेजांसि च तमांसि च।
महीयस्तदहं वंदे चिदानंदमयं महः॥

अन्तिम पाठ तथा प्रशस्ति—

न रोगाणां क्रमः कोऽपि निदाननिरूपणं।
केवलं बालबोधाय योगाः केऽपि निरूपिताः॥
सूरीश्वरप्रवरसर्वशिरावतंस,
श्री चन्द्रकीर्त्तिगुरुपादयुगप्रसादात्।
गंभीरचारुतरवैद्यकशास्त्रसारं,
श्री हर्षकीर्त्तिवरपाठक उद्धारः॥ २॥

विचार्य्य पूर्व्वशास्त्राणि हर्षकीर्त्याख्यसूरिभिः।
किं विदुः क्रियाता तस्मै मद्भूहस्यं विद्यकार्णवात् ॥ ३ ॥

× × × × ×

यथा जननामिह वांछितार्थान् चिंतामणि पूरयंतु समर्थः।
तथैव सत्तं षजभूरियोगान् श्री योगचिंतामणि रापिपर्त्ति ॥ ४ ॥

श्रीमन्नागपुरीय तपोगच्छीय श्री हर्षकीर्त्तिसूरि संकलित श्री योगचिंतामणौ वैद्यकसारसंग्रहे सप्तमको मिश्रकाध्यायः।

४३. राजवार्तिक।

रचयिता श्री भट्टाकलंकदेव। भाषा संस्कृत। पत्र संख्या ५५४. साइज १२×४ इञ्च। प्रत्येक पृष्ठ पर ११ पंक्तियां तथा प्रति पंक्ति में ४०-४३ अक्षर। प्रति सुन्दर है।

संवत् १५८२ वर्षे आषाढबुदि १३ श्री मूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्री कुंदकुंदाचार्यान्वये भट्टारक श्री पद्मनन्दिदेवास्तत्पट्टे भट्टारक श्री शुभचन्द्रदेवास्तत्पट्टे भट्टारक श्री जिनचंद्रदेवास्तत्पट्टे भट्टारक श्री प्रभाचंद्रदेवास्तदाम्नाये खंडेलवालान्वये वाकलीवालगोत्रे चंपावतीवास्तव्ये राव श्रीरामचन्द्रराज्ये संघभारधुरंधर संघपति स० तोको तद्भार्या पूनी तयोः पुत्रौ सा० चाया द्वितीय ताल्हू। सा० चाया भार्या गूजरि तत्पुत्र रामा द्वितीय होला। सं० ताल्हू भार्या नौलादे तयोः पुत्र सद्गुरुपदेशनिर्वाहकौ चतुर्विधदानवितरणकल्पवृक्षौ जिनपूजापुरंदरौ स० लाल्हू द्वितीय सं० वाल्हू भार्या ल तादे। सं० वाल्हू भार्या बहुसिरि एतेषां मध्ये इदं शास्त्रं कर्मक्षयनिमित्तं लिखाप्य भक्त्या ब्रह्मलालाय दत्तं।

४४. वरांगचरित्र।

रचयिता परवादिदंतिपंचानन भट्टारक श्री वर्द्धमानदेव। भाषा संस्कृत। पत्र संख्या ७२. साइज ११×५ इञ्च। सम्पूर्ण पद्य संख्या १३८३. लिपि संवत् १५६५.

मंगलाचरण—

जिनस्य सज्ज्ञानमयेन दर्पणे जगत्समस्तं प्रतिबिंबतां गतं।
स यस्य संसारविमोहितात्मनं पुनातु चेतांसि सतां निरंतरं ॥ १ ॥

अन्तिम पद्य तथा प्रशस्ति—

स्वस्ति श्री मूलसंघे भुविविदितगणे श्री बलात्कारसंज्ञे,
श्रीभारत्यादिगच्छे सकलगुणनिधिर्वर्द्धमानाभिधानः।
आसीद्भट्टारकोऽसौ सुचरितमकरोच्छ्रीवरांगस्यराज्ञो,
भव्यश्रेयांसि तन्वद्भुवि चरितमिदं वर्त्ततामाकेतारं ॥ १ ॥

प्रमाणमस्य काव्यस्य श्लोका ज्ञेया विशारदैः ।
अनुष्टुप् संख्यया सर्व्वे गुणो माम्नीदुसम्मिताः ॥ २ ॥

संवत १५६५ वर्षे माघमासे शुक्लपक्षे षष्ठी दिवसे शनैश्चरवारे उत्तरानक्षत्रे रावश्री मालदे राज्य-प्रवर्त्तमाने रावत श्री खेतसीप्रतापे सांखौणनामनगरे श्री शांतिनाथजिनचैत्यालये श्री मूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्री कुंदकुंदाचार्यान्वये भट्टारक श्री पद्मनन्दिदेवास्तत्पट्टे भट्टारक श्री शुभचन्द्र-देवास्तत्पट्टे भट्टारक श्री जिणचन्द्रदेवास्तत्पट्टे भट्टारक श्री प्रभाचन्द्रदेवास्तत् शिष्यमंडलाचार्य श्री धर्मचन्द्रदेवा स्तदाम्नाये खंडेलवालान्वये अजमेरा गोत्रे सा० चोखा तद्भार्या वीरणि तयो पुत्रौ द्वौ प्रथम सा चेला द्वितीया सा० खेमा । सा० चेला भार्ये द्वे प्रथम हररवू द्वितीय नाल्ही तत्पुत्रास्त्रय: प्रथम सा श्रीपाल द्वितीय सा० पोल्हण तृतीय सा० भांकू । सा० श्रीपाल भार्या सूवट तयोः पुत्रौ द्वौ प्रथम सा जिनदास द्वितीय सा० ऋषभदास । सा० पोल्हण तद्भार्या होली । सा० भांकू भार्या टोमा तयोः पुत्र चिरंजी नानिग । सा० खेमा भार्या रोहिणी तयोः पुत्र सा० हाल्‌हू तद्भार्या हल्लसिरि एतेषां मध्ये जिनपूजापुरंदर चतुर्विध दानवितरण कल्पवृक्ष सद्गुरुपदेशनिर्वाहक सा० श्रीपालेन इदं शास्त्रं लिखाप्य उत्तमपात्राय दत्तं ।

प्रति नं० २, पत्र संख्या ६०, साइज १२×५ इञ्च । प्रति प्राचीन है । लिपि संवत् १६६०.

प्रशस्ति —

संवत् १६६० वर्षे ज्येष्ठ सुदी १४ तिथौ भृगुवासरे श्री राजमहलनगरे महाराजाधिराजराजा श्री मानसिंहजी राज्यप्रवर्तमाने श्री मूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्री कुन्दकुन्दाचार्यान्वये भट्टारक श्री पद्मनन्दिदेवास्तत्पट्टे भट्टारक श्री शुभचन्द्रदेवास्तत्पट्टे भट्टारक श्री जिनचन्द्रदेवास्तत्पट्टे भट्टारक श्री प्रभाचन्द्रदेवास्तत्पट्टे भट्टारक श्री चन्द्रकीर्त्तिस्तदाम्नाये खंडेलवालान्वये काशलीवालगोत्रे याचकजनसंदोह-कल्पवृक्ष श्रावकाचारचरणनिरतचित्त साह सोढा तद्भार्या सीलतोयतरंगिणी विनयवागेश्वरी सोहिलादे तयो पुत्राश्चत्वार । प्रथम पुत्र धम्मधुराधरणधीर साह श्री छाजू तद्भार्या दानशीलगुणभूषणा भूषितगात्रा नाम्ना छायलदे तयो पुत्रो द्वौ । राजसभाशृंगारहार स्वप्रतापांदनकर मुकुलिकृत शत्रुमुख कुमुदाकर स्वजसनिशाकर आल्हादित कुवलयदानगुण अल्पांकृतकल्पपादपश्री पंचपरमेष्ठिचिंतनपवित्रतचित्तसकलगुणीजन-विश्रामस्थान प्रथम साह जेहा तद्भार्या जेहलदे तयोः पुत्राश्चत्वारः । प्रथम पुत्र देवा तद्भार्या देवलदे द्वितीय पुत्र साह ईसर तृतीया पुत्र कुंता चतुर्थ पुत्र भगवान । द्वितीय पुत्र करमसी तद्भार्या करणादे तयोः पुत्र साह नेमा तद्भार्या नेमलदे तयोः पुत्रास्त्रयः । प्रथमपुत्र दानगुणश्रेयांस सकलजनानंद कारक स्ववचन प्रतिपालनसमर्थ सर्व्वोपकारक साह हरषा तद्भार्या स्वपतिछंदानुगामिनी शीलालंकृतगात्राः साध्वी हरषदे द्वितीय पुत्र साह वेणा तद्भार्या बहुरंगदे तृतीय पुत्र फलहू । पुत्र साह खेम तद्भार्या खेमलदे तयोः पुत्राः द्वे प्रथमपुत्र साह जेसा द्वितीय हय तृतीय पुत्र साह धर्मा तद्भार्या धारादे तयोः पुत्र बीरु द्वितीय पुत्र राइमल तस्य भार्या रयणादे तृ० पुत्र दुर्गा तस्य भार्या दुर्गमदे चतुर्थ पुत्र साह टीला तस्य भार्या टीलमदे

तयो पुत्र साह जगलाम तस्य भार्या हमीरदे तयो पुत्र साह जगमाल तस्य भार्या जौणादे द्वितीय पुत्र साह काशू तृतीय पुत्र कल्याण तस्य भार्या करुणादे एतेषां मध्ये साह हरषा तस्य भार्या हरषमदे लिखाप्य शास्त्रवरांगचरित्रं जेठजिणवरव्रत प्रद्योतनार्थं भार्या श्री शुभचंद्राय दत्तं ।

प्रति नं० ३. पत्र संख्या ७३. साइज १३×५ इञ्च । लिपि संवत् १८७३.

संवत् १८७३ वर्षे आश्विन कृष्णपक्षे ५ बुधवासरे श्रीमत् ग्वालेरमुत्सलसलकर महाराजि दौलतरावसिंध्या राज्यप्रवर्त्तमाने श्री आदिनाथचैत्यालये धर्मोत्सवमानसचतुसंघ युते वाद्यगीत मंगल प्रवर्द्धित नित्योत्सवे श्रीमूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्री कुंदकुंदाचार्यान्वये श्रं बावली सुपट्टे सकलभट्टारक शिरोमणि भट्टारक श्री महेन्द्रकीर्त्ति जिष्णुना पट्टोदयाद्रि सहस्ररश्मिसन्निभ भट्टारक श्री श्री क्षेमेन्द्रकीर्त्तिजित्त्वाविभौमानां पट्टलंकारलजायमान भट्टारक श्रीसुरेन्द्रकीर्त्ति तदाम्नाये खंडेलवालान्वये टोंग्या गोत्रे धर्मशिरोमणि साहजी श्री जिणदासजी तस्य पत्नीकुक्षौ पुत्रास्त्रयः ज्येष्ठ पुत्र रतनचंदजी मध्यपुत्रः फतेचंदजी तस्य पुत्रौ द्वौ ज्येष्ठ पुत्र रामलालजी लघु पुत्र केवलरामजी तस्य पितृव्य वंशाद्रौ सहस्ररश्मि सदृश धर्मभारधुरंधर सेठजी श्री मनीरामजी तस्य पत्नि कुक्षौ पुत्र लक्ष्मीचंद्र एतेषां मध्ये ज्ञानावरणीयकर्मक्षयार्थं वरांगचरित्र ग्रंथं घटापितं ।

४५. वर्द्धमानपुराण ।

रचयिता भट्टारक श्री सकलकीर्त्ति । भाषा संस्कृत । पत्र संख्या ८०. साइज ११×५। इञ्च । प्रत्येक पृष्ठ पर १३ पंक्तियां तथा प्रति पंक्ति में ५२-५६ अक्षर । प्रति नवीन तथा सुन्दर है । लिपि संवत् १८०४.

मंगलाचरण—

जिनेशे विश्वनाथाय ह्यनंतगुणसिद्धये ।
धर्मचक्रभृते मूर्द्धना श्री वीरस्वामिने नमः ॥ १ ॥

अन्तिम पद्य—

जल्पितेन बहुना किमाश्रयेद्वीरनाथं इह यो मया स्तुतः ।
मे ददातु कृपया श्रसोद्भुतान्, मुक्तये निजगुणान् स्वशर्मणे ॥ १ ॥
त्रिसहस्त्राधिकापञ्चत्रिंशच्छ्लोकाः भवन्ति वै ।
यत्नेन गुणिताः सर्वे चरित्रस्यास्य सन्मतेः ॥ २ ॥

इति श्री भट्टारक श्री सकलकीर्त्तिविरचिते श्री वर्द्धमानपुराणे श्रेणिकाभयकुमारभवावली भगवन्निर्वाणनामैकोनविंशतिमोऽधिकारः ।

संवत् १८०४ वर्षे माहमासे शुक्लपक्षे चतुर्दश्यां तिथौ बृहस्पतिवासरे श्री सवाईजयपुरनगरे महाराजाधिराज राजा श्री प्रतापसिंहराज्यप्रवर्त्तमाने श्री मूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्री

कुन्दकुन्दाचार्यान्वये भट्टारक श्री जगत्कीर्तिदेवास्तत्पट्टे भट्टारक श्री देवेन्द्रकीर्तिदेवास्तत्पट्टे भट्टारक श्री महेन्द्रकीर्तिदेवास्तत्पट्टे भट्टारक श्री क्षेमेन्द्रकीर्तिदेवास्तत्पट्टे भट्टारक श्री सुरेन्द्रकीर्तिदेवास्तदाम्नाये गंगवाल-गोत्रे याचकजनसंदोहकल्पवृक्ष श्रावकाचारचरणनिरतचित्त साहजी श्री मूलचंदजी तद्भार्या शीलतोयतरंगिणी विनयवागेश्वरी मल्लूकदे तयोः पुत्र धर्मधुरंधर चतुर्विधदानेषु सदा वितरणसमर्थ साहजी श्री दौलतरामजी तद्भार्या दानशीलगुणभूषण भूषितगात्रा नाम्ना दौलतादे तयोः पुत्रास्त्रयः। प्रथम पुत्र साह सभाराम सभाशृंगारहार स्वप्रतापदिनकरमुकलितशत्रुमुख कुमुदाकर स्वयशसनिशाकर आह्लादितकुवलयदानगुण-अल्पं कृतकल्पपादप श्री पंचपरमेष्ठीचिंतन पवित्रितचित्त सकलगुणीजनविश्रामस्थान साह श्री हाथीराम तद्भार्या शीलदान गुणदेह विनयभक्तिपूजाभूषितवपुषा स्वपतिछंदानुगामिनी नाम छाजी द्वितीय पुत्र नाम साहिसाहिबराम तद्भार्या साहिबादे तयोः पुत्र नाम साह सहजराम तद्भार्या नाम सहुतादे एतेषां मध्ये स्वकुलाकाशप्रकाशनचंद्रसज्जनजनचकोरचक्षु श्री सर्वज्ञवदनोद्गतस्वज्ञानसुधापान स वर्द्धितानादि-कालीन मिथ्यात्वमहागरल साह श्री हाथीराम तेनेदं षट्चत्वारिंशद्गुणविराजमान श्री वर्द्धमानपुराणं लिखाप्य परवादीमकुंभस्थलविदारनैकमृगेंद्र स्ववचनचातुरी निरस्कृतमिथ्यात्ववादयः तस्य पंडितजी श्री चोखचंदजी तत् शिष्य पं० कृष्णदासाय दत्त कर्मक्षयनिमित्तं ॥

प्रति नं० २. पत्र संख्या १२३. साइज ११॥×४॥ इञ्च। लिपि संवत् १६६८. प्रति पूर्ण तथा सुंदर है।

संवत् १६६८ वर्षे भाद्रपदमासे शुक्लपक्षे द्वादश्यां रविवासरे श्रीमद्वागड महादेशे श्री सागपत्तने श्री मूलसंघे आचार्य श्री कुन्दकुन्दाचार्यान्वये भट्टारक श्री पद्मनन्दिदेवास्तत्पट्टे भट्टारक श्री सकलकीर्तिदेवा स्तत्पट्टे भट्टारक श्री भुवनकीर्तिदेवा स्तत्पट्टे भट्टारक श्री ज्ञानभूषणदेवास्तत्पट्टे मंडलाचार्य श्री ज्ञानकीर्तिदेवा स्तत्पट्टे मंडलाचार्य श्री रत्नकीर्तिदेवास्तत्पट्टे मंडलाचार्य श्री यशःकीर्तिदेवास्तत्पट्टे मंडलाचार्य श्री गुणचन्द्रदेवास्तत्पट्टे मंडलाचार्य श्री जिनचन्द्रदेवास्तत्पट्टे मंडलाचार्य श्री सकलचन्द्रदेवोपदेशात् हुंबड जातीय वजीयाण गोत्रे पासडोत साह जोगा भार्या जोमादे सुत साह नाका भार्या बाई श्री तद्दनायके तया इदं शास्त्रं स्वज्ञानावरणीकर्मक्षयाय सत्पात्राय पं० श्री सकलचंद्राय तद्दोक्षिता बाई हीरा लिखाप्य दत्तं।

४६. श्रावकाचार सार।

रचयिता श्री पद्मनन्दि मुनि। भाषा संस्कृत। पत्र संख्या ४१. साइज १२×४॥ इञ्च। प्रत्येक पृष्ठ पर १३ पंक्तियां तथा प्रति पंक्ति में ४८-५२ अक्षर। रचना संवत् १५८० लिपि संवत् १५६४.

मंगलाचरण—

स्वसंवेदनसुव्यक्त महिमानमनश्वरं।
परमात्मानमाद्यतं विमुक्तं चिन्मयं नमः॥ १॥

समाप्ति—

इति श्रावकाचारसारोद्धारे श्री पद्मनन्दिमुनि विरचिते द्वादशव्रतवर्णनं नाम तृतीयः परिच्छेदः।

तत् शिष्यो गुणरत्नराजितमतिः श्रीसिंहनन्दीगुरुः,
सद्रत्नत्रयमंडितोतिनितरां भव्यौघनिस्तारकः।
तेषां पादपयो न मुग्धमधुपः श्री नेमिदत्तायते,
चक्रे चारुचरित्रमेतदुचितं श्रीपालजं सत्क्रियात् ॥ २ ॥
अग्रोत्तोत्तमवंशमंडनमणिः स ब्रह्मचारीशुभः
श्री भट्टारकमल्लिभूषणगुरोः पादाब्जसेवारतः।
जीयदत्र महेंद्रदत्त सुयती,संज्ञानवार्न्निर्मलः
सूरि श्री श्रुतसागरादियतितनं सेवा परः सन्मतिः ॥ ३ ॥

ख्याते मालवदेशस्थे पूर्णाशानगरे वरे
श्री मदादिजिनागारे सिद्धं शास्त्रमिदशुभं ॥ ४ ॥
संवत् सार्द्ध सहस्त्रे च पंचाशीति समुत्तरे।
आषाढशुक्ला पंचम्यां संपूर्णं रविवासरे ॥ ५ ॥

इति श्री सिद्धचक्रपूजातिशयं प्राप्ते श्रीपालमहाराजचरिते भट्टारक श्री मल्लिभूषणशिष्याचार्य श्री सिंहनन्दि ब्रह्म श्री शांतिदासानुमोदिते ब्रह्म नेमिदत्तविरचिते श्रीपालमहामुनींद्र निर्वाणगमनोनाम नवमोधिकारः समाप्तः।

श्रीमदग्रोतान्वये यो गोत्रेगोयलमंडितः।
स श्री रामादासाख्यो तत्तनूजो गुणाग्रणी॥ १ ॥
सुरापगादितार्थेषु स्नानेषु यः सदारतः।
सः श्रीमान् क्षेमदासोभूत क्षमादिगुणसागरः ॥ २ ॥
हरेरर्चा गुरोर्भक्तिः दानतत्परमानसः।
नृणानां हृदयिग्रासो सौचीयंया सुखावह ॥ ३ ॥
महागुणवतीरम्या सुचरित्रापतिव्रता।
क्षेमश्री नाम तस्यासीद्भार्या लावन्यसुन्दरी ॥ ४ ॥
तयोः पुत्राः समुत्पन्ना त्रयः रत्नत्रयोपमा।
निजवृत्तेषु ये लीनाः भूपैः सन्मानिताः सदा ॥ ५ ॥
ज्येष्ठोति च गुणश्रेष्ठो धर्मज्ञो धर्मवत्सलः।
निजाचारेषु यो लीनो सः श्रीकेशवनामभाक् ॥ ६ ॥
मृद्वांगी कामलापीमानसे कल्याणान्विता।

दानेन कल्पवाल्ली घातद्भामाराजमत्यपि ॥ ७ ॥
तयोः पुत्रव्यसुदेवः गुणज्ञो गुणसागरः ।
तद्भार्या गुणभामा नाम्ना परिमलदेसती ॥ ८ ॥
शीः बर्त्तिः तपः स्नेहद्वौकुलेद्योतिदीपिका ।
विल्लुदासः द्वितीयः स्यात् ·······मौक्तिकतत्परः ॥ ६ ॥
तत् भामात् रमात्याख्यः शोभा दिगुणमंडिताः ।
तयोः पुत्री बभूवासौ श्रीमथुरनामभाक् ॥ १० ॥
कुशांगाणी महांगीणैः पयः पाणेश्च वर्द्धितं ।
तृतीयस्तु महार्विज्ञो गुणज्ञो गुणभूषणः ॥ ११ ॥
श्रीमनमोहनदासाख्यो विनयादिगुणालंकृतः ।
तद्भामा गुणाधामश्च सुंदरी शुभलक्षणः ॥ १२ ॥
तयो सूनुः बभूवासौ देवीदास गुणाधिकः ।
तद् भार्या च भवेत्साध्वी नाम्ना भोगमती मता ॥ १३ ॥
तयोः पुत्रौ समुत्पन्नौ बालदीलाविराजितौ ॥
प्रथमः सुत आनंदी द्वितीयः हेमराज भाक् ।
शुभाद्ययफलंपुत्राः पुण्यात् किं किं न जायते ॥
चक्रे महोत्सवं रम्यं जगज्जनमनः प्रियं ।
सत्यं सत्पुत्रसंप्राप्तौ किन्न कुर्वन्ति साधवः ॥

एतेषां मध्ये शीलतोयतरंगिनो दानगुणचेलना कल्पवल्ली बनुरमती इदं पुस्तकं श्रीपालनाम चरितं संपूर्ण ॥ संवत १७१४ वर्षे श्रावणमासे शुक्ल पक्षे पार्वणी द्वितियादि वसे भृगुवासरे श्रीमत्काष्ठासंघे माथुर गच्छे आचार्य श्री श्री श्री १०८ केशवसेनजी तत्पट्टे भट्टारक श्री देवेंद्रकीर्तिजी आचार्य श्री १०८ यशकीर्ति जी ब्रह्म पं श्री पद्मसागरजी ब्र. श्री दयासागरजी ब्र. कल्याणसागरमिदं पुस्तकं लिखितं ।

४८. श्रेणिकचरित्र ।

रचयिता आचार्य शुभचन्द्र । भाषा संस्कृत । पत्र संख्या १०८. साइज ६॥×४ इञ्च । प्रत्येक पृष्ठ पर १० पंक्तियां तथा प्रति पंक्ति में ३६–४० अक्षर । लिपि संवत् १७६६.

मंगलाचरण—

श्री वर्द्धमानमानंदं नौमि नाना गुणाकरं ।
विशुद्धध्यानदीप्त विहुतकर्मसमुच्चयं ॥ १ ॥

अन्तिम पाठ तथा प्रशस्ति—

